CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13
Coll. No. 261

Title Śiva kavaca

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 261. Subject: Tantra

Title: Śivakavaca.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.7" x 4.2" Extent: 8 foll.

Language: Sanskrit. Script: Devanagari

Remarks: Complete

॥श्रीसदाशिवउवाच॥ ॥इतितद्वचनंश्रुत्वासभूपालोतिविस्मितः॥कवचंदेवदेवस्ययदेत्याहमुनिःशिवे॥दधीचि
स्तद्वचःश्रुत्वातदासंतुष्टमानसः॥मदीयंकवचंपक्कुंसघ्यागवसमारभे॥दधिचिरुवाच॥कवचंदेवदेवस्यवक्ष्येशृ
णुनराधिपः॥येनावृतोमहादुःखैर्युक्तोमुक्तिंचविंदति॥ध्येयःश्रीमन्महादेवःसांबःसंसारमोचकः॥पवित्रहा
यैःशुद्धैर्भस्मरुद्राक्षभूषणैः॥श्रीविश्वेशमुमासहायमनघंविश्वात्मकंचिद्घनंसत्यंज्ञानमनंतमक्षरमजंनिर्लिप्त
मेकंप्रभुं॥ओंकारात्मकमक्षरंपरतरंब्रह्मादिभिर्भावितंसानंदंहृदिभावयेद्भवभयध्वांतेमुमानंदरं एवंध्या
त्वामहादेवंसच्चिदानंदलक्षणं॥कवचेनावृतोभूत्वामृत्युपाशैर्विमुच्यते॥यद्ब्रह्मरंध्रममसंविदाभंतद्ब्रह्मरं
ध्रेभगवानुमेशः॥पापाक्षसंस्थानमनंतलक्षणंनिवार्यसर्वाघकुलंनिरंतरं॥तत्पात्वर्वमयाम्निगमीत
चारीरुद्रःशिखायांतुशिवावतंसः॥शिरशिखंपातुममेंदुचूडफालंममाव्यान्मज्वलनोरुफालः॥वामकपोलै

ममयातुशंभुःकपोलमीशोवतुदक्षिणंमे॥पायाद्गिरीशोममवामनेत्रंत्रिलोचनोदक्षिणमक्षिपायात्॥भ्रूयुग्मम
व्याद्वृषभध्वजोमेभ्रूमध्यमव्यान्मखनाशदक्षः॥नासापुटंपातुममांतकांतकोनासांतरंपातुपिनाकपाणिः॥मु
खंममाव्याद्दृचिपंचवक्त्रःपायान्ममोष्ठौशुचिकृत्तिवासाः॥दंतान्ममाव्यात्प्रभुरिंद्रदंतोजिह्वांममाव्यात्त्रिग
मांतजिह्वः॥श्रीनीलकंठोवतुकंठदेशंपायान्महेशोवतुकंठपार्श्वे॥स्कंधौममाव्यान्मदनांतकारीवक्षस्थलं
पातुममांबिकेशः॥विश्वंभरोव्याद्दुदरंममेदंसर्वेश्वरोरक्षतुरोमकूपान्॥अंत्राणिपायाद्दुरुशक्तिरव्याद्दस्थी
निविश्वस्थितिनाशहेतुः॥त्रियंबकोदक्षिणबाहुमव्याद्वामंममाव्याद्भुजगावनद्धः॥प्रकोष्ठमव्याद्गिरिराज
चापोहस्तौममाव्याद्धरशूलहस्तः॥पिनाकनाथोवतुहस्तशाखान्नखान्ममव्यान्नरसिंहहारी॥पृष्ठंममाव्यात् १
त्रिपुरारिरव्यात्कटिद्वयंमेगिरिजासहायः॥कट्यंतरालंममपातुशंभुरूरुद्वयंमेमृगशावपाणिः॥जा

नुद्वयंपातुजनार्दनेशोगुल्फद्वयंपातुविराट्स्वरूपः॥पादौममाव्याद्दमरैकवंद्यःपायाधरःपादतलद्वयंमे॥पा
दांगुलीशान्समस्तरूपोसर्वांतनूंपातुमहेश्वरोमे॥प्राच्यांसदारक्षतुनीलरुद्रोकर्पूरगौरोवतुदक्षि
णस्यां॥पातुप्रतीच्यांभगनेत्रहारीपायादुदीच्यांजगदेकनाथः॥ममोर्ध्वमव्याद्दुराजकांतिरधोम
मांव्याद्दुरगेंद्रभूषः॥दिगंतरालेषुसमस्तनाथोपायाद्वृषाधीश्वरकेतुलक्ष्यः॥नदीषुमांरक्षतुविश्वना
थःकूपेषुमांरक्षतुविश्वमूर्त्तिः॥पायात्समुद्रेषुजलाधिराजःसरित्समुद्रादिविधानदक्षः॥वात्यासुपायाद
तिवात्यवर्तीश्यानलात्पातुदलाँवानलाभः॥गर्भेषुपायात्सुरवर्गहारीवृक्षेषुपायाद्विषवृक्षहारी॥ग
जेषुपायाद्गजदर्पहारीपायाद्विषादीद्यपिवीरभद्रः॥सर्वेषुपायद्विषसर्पहारीपापात्त्रिमूर्त्तिर्विषिष्ट

श्वि ऋकैकेषु॥ सिंहादिभीतेरवतु प्रभेशः पायादटव्यां परत्रानुहारी॥ शैलेषु मां रक्षतु शैलवासी पाया
द्विलासी गिरिगह्वरेषु॥ भूताधिपः पातु विरोधिभीतेः पायात्पिशाचादिषु भूतनाथः॥ मृत्युंजयो र
क्षतु मृत्युभीतेः कालाग्निरुद्रोवतु कालभीतेः॥ पायादरिख्याद्धकुपातकेभ्यः पायाद्ग्रहेभ्यः कमला
सनार्चितः॥ श्रीविष्णुनेशार्चितपादपद्मः पातु प्रभातेष्वखिलेषु शंभुः॥ मध्यंदिनेष्वेव मृडो निशीमांसाया
न्हि पायादमराधिनाथः॥ महेश्वरो रक्षतु मध्यरात्रे पायादुषस्यंधकनाशहेतुः॥ सर्वेषु कालेष्वपि पातु
शंभुरुमांगसंश्लिष्टमनोज्ञदेहः॥ मार्गे मृगव्याधवपुर्धरो व्याद्युद्धेषु पायादसुरौघहारी॥ सर्वत्र सर्वार्ति २
हरो हरो व्यात्सर्वेप्सितार्थप्रदरूपधारी॥ रक्षाविहीनस्थलमस्ति यन्मे तत्रावतु ब्रह्मजनार्दनेशः॥ कृत्वै

वं कवचं पूर्वं स्तोत्रमेतत्पठेन्नरः॥ स्तोत्रं चैतन्महेशेन तस्मै प्रख्यातमादरात्॥ हरहरमखहर प्ररारेणहे
सुरासुरपापारे धमारे॥ धमारे भूतभयंकर भवभयहर शंकर संसारे॥ सर्गस्थितिकारण पुराण विष
मोक्षण पिनाकपाणे त्रिशूलपाणे चंद्ररेखाभरण कारण कारण मृगपाणे॥ मणिगणमंडित फणिग
णाक्षणत्फणिपतिभूषण निर्जितकाम संपूर्णकाम विविधानंतकल्याणगुण॥ गौरीमनोभिराम योगिम
नोभिराम विविधनिर्मितिसाम॥ विविधश्रुत्यभिहित परमाद्भुतधाम॥ स्मरशासन सुमेरुरत्नरुचिरवर
शिखर॥ शिखरशिखरीवरकृतसमलंकृत स्मरशासन॥ संहृतकमलासनसंदुग्धासुरवरत्रिपुर
सुरकानन हिमगिरिनिभवृषभाधिपकेतन गुरुतरकरुणानिधानाधिककृत मामननिर्मितिपव

नवकृत्तिवसन॥ पंचविध पंचानननिजभक्तहृदय॥ येन महारजतविराजितविविधरत्नवरसिंहा
सने॥ शार्दूलचर्मवसनसमधिष्ठितवसन महमहार्घ्यमशासन॥ भक्तभवभंजनसोमसूर्याग्नि
नयनकालकूटविषादन॥ जयजयमहेशकेशवेशानयजयाविकेशव॥ जयजयविश्वेशजयजय
गौरीशजयगजहमहतगजाधीश॥ ज्वलज्वलज्वालितमहाज्वलनसंहारसंहरसंसारशमरवरनाश
यनाशयपातकमुन्मूलयोन्मूलयविबोधयविबोधयभूतभयमाक्रादयाक्रादयदेहिदेहिभक्ति
मात्यरवंदाद्रिवंय चंद्रचूड॥ इंद्रश्चैंद्रोपेंद्रादिसकलसुररत्नकिरिटप्रभाशुभूषितदिव्यरत्नखचित ३
विविधमणिपादुक॥ लक्ष्मीपतिनयनारविंदपूजितपादपद्म मुनिवरहृत्पद्मभुक्तिमुक्तिफलप्रदाद्रलि

तामरवैरिनिकरकरराजितमृगशावशावचंद्रावतंससमधिष्ठितकाशीनगरवरप्रदवरयो
गिचित्तचिंतितजनमंदर॥ मंदारकुसुमकरवंदारुवृंदारकपूजित॥ जितमन्मथनंदानंदिकुल
कुलाचलरसातलातलसुतलवितलादिनानाभुवननायक॥ नायकरत्नरत्ननूपुरविलसत्पा
दपंकजजगदेकनायकजयजयमहादेवदेवतासार्वभौमभक्तार्तिभंजन॥ करुणाकरशंकरेशम
हेशशंभोभवभर्गपिनाकपाणे॥ संसारसागरमसारमघोरमात्यंमामुद्धरत्रिपुरसूदनमन्मथारे॥
गौरीपते पुरहराभितपूण्यमूर्त्ते भुक्तिनायकयमांतकविश्वमूर्त्ते॥ संसारसागरमसारघोरमात्यंमामु
द्धरत्रिपुरत्रिपुरसूदनमन्मथारे॥ विश्वाधिकाव्ययविशुद्धगुणस्वभावनिर्द्वंद्वनित्यरूपाधिकनि

र्विकारसंसारसोमसूर्याग्निनेत्रहरिनेत्रसमर्चितांघ्रिब्रह्मेंद्रमुख्यसुरवंदितपादपद्म॥निर्लिप्तपासुरासु
रसर्गवर्गस्थितिप्रलयकारणसर्वरूप॥संसारसागरमसारघोरमाशुमामुद्धरत्रिपुरसूदनमन्मथारे॥
शार्दूलचर्मपरिवीतसुरासुरेशकर्पूरगौरकरुणाकरचंद्रमौले॥संसारसा० बिल्वार्चनप्रियविभूति
विभूषितांगनिःसंगनिर्गुणनिरंजननिर्विकार॥संसारसा० योगींद्रमानससरोरुहसन्निविष्ट
ज्ञनेष्टस्रलिंग॥संसारसा० शांतीतकीर्तमुमुक्षुजनाभिसेव्यःशैलाधिराजश्रेष्टेष्टदायकनि
विष्टजनेष्टस्रलिंग॥संसारसा० शांतांतकांतमुमुक्षुजनाभिसेव्यःशैलाधिराजतनयायुतवामभा ४
ग॥संसारसा० कल्याणरूपकनकाचलचारुचापविज्ञानरूपदुःखापविग्रहप्राप॥संसारसा० चे

दांतवैभवविभवाव्ययशुद्धवृत्तेष्टतिप्रदाभयदक्षदयासमुद्र॥संसारसा० महादेव उवाच॥इतिस्तुत्वा
तुमामादौकृत्वातुकवचंनृप॥सर्वपापविनिर्मुक्तोमामुपैष्यत्यसंशयं॥अनेनकवचेनैवसंवृतोय
त्रयोवसेत्॥सर्वपापविनिर्मुक्तस्तत्रसौख्यंलभेन्नरः॥दधिचिरुवाच॥एवमुक्त्वामहादेवोतत्नकोवां
प्रतिप्रभुः॥तत्रैवलिंगेकादमीरिक्षणादंतर्द्धिनृप॥श्रीरुद्रकवचांक्रांतःश्रीमहारुद्रपूजकः
॥सर्वपापविनिर्मुक्तःशिवलोकंगमिष्यति॥श्रीरुद्रकवचंजप्त्वाकृत्वाश्रीरुद्रपूजनं॥जप्त्वापंचा
क्षरंसर्वशौचंनिष्पापोजायतेनरः॥इदंतुकवचंपूर्वंमंबायैशंकरोदितं॥षण्मुखायातिभक्ताय
देव्यापीसुमुदीरितं॥ततःपरंषण्मुखेनमह्यमुक्तंनराधिप॥इदंतुपरमप्रेम्णामयातुभ्यमुदी

रितं॥यदाप्रभृत्यनेनाहंकवचेनावृतोनृप॥तदाप्रभृतिदुःखानिनदृश्यंतेमयाध्रुवं॥पुरस्यनिधनंक
र्तुंपुराविष्णुःसमुद्यतः॥जयप्रदंकिमस्तीतिमामुवाचकृतांजलिः॥ततस्तस्मैमयैवोक्तमिदंकवचमुत्त
मं॥अनेनकवचेनैवसंवृतःसयवौहरिः॥ततस्तेनजयःप्राप्तःकवचस्यप्रभावतः॥अघोरयन्त्रकव
चमिदंशैवमनुत्तमं॥अनेनकवचेनैवकवचीसमभूद्धरिः॥एतत्कवचसंबंधाद्धरिर्नावापवेदनां॥त
तःपरंमुरंहत्वाहरिःप्रायहिमालयं॥तदाकण्वःसमागत्यहरिंप्राहकृतांजलिः॥कण्वउवाच॥संसारता
पसंतप्तंममचित्तमभूद्धरे॥कथंसंसारसंतापविच्छित्तिस्याद्वदस्वमे॥विष्णुरुवाच॥संसारसागरेघोरे ५
निमग्नानांदुरात्मनां॥अपारकरुणासिंधुःसांबएवावलंबनं॥शिवमेवभजस्वत्वसावधानःसतुसंसार

हरःपुरापुरारी॥बहवस्तमुपास्यमुक्तिमापुस्त्रिपुरात्रिर्निजिभक्तमुक्तिहेतुः॥नवबिल्वदलैरथातको
तकैयजकामांतकमंतकोत्तकोतंविपदंतकमंतकांतकंशिवलिंगात्मकमाशुसंतकं॥बहुपापवि
मोचकंप्रभुयदिकालीतकमर्चयिष्यति॥भासिताभरणोभजप्रभुंभवभीतिर्नभविष्यतित्वयि॥अ
भदस्त्वयिशंभुरव्ययोनियतोतिष्ठतितत्समर्चनाय॥नवबिल्वपलाशकाशपुष्पैर्गिरिकर्णिकतका
ह्वयप्रसूनैः॥भसितेनचफालंलोचनंशिवलिंगेसततंसमर्चय॥सकृदप्यमलैःसबिल्वपल्लवैःकुश
धुतूरपलाशकाशपुष्पैःसुजलैरभिपूज्यपार्वतीशंसकलापज्जलधिंतरीतिधीशः॥हृदितिष्ठतिशी
जापतौशिवलिंगेचनिरंतरंशिवेनयजंतिशिवंनराधमानरवास्तरतानिरंतरं॥विदधातिपरंपदंशि

वः कुशपत्रैरपि साधु पूजितः॥ तमुपास्य महेश्वरं भ्रमात्सुरमन्यं समुपासते जनः॥ भगवंतमुमापतिं
भज भजनीयं न भजंति ये जनाः॥ नरकेषु पतंति ते जनाः सततं सत्यमथोच्यते जनाः॥ दिवि ये निवसंति
भूतलेपि ग्रसिताः संसृतिघोरबंधमुक्तैः। द्विजते शिवपूजनौषधं समवाप्यामृततां प्रयांति सत्यं॥ सकृद
प्यतिभक्तिपूर्वकं शिवमेकं प्रणमंति ये जनाः॥ अमरैरखिलैश्च ते नताः सततं सत्यमिदं ध्रुवं ध्रुवं॥ कृत
सर्वमखोपि जन्मयत्नेकृतविश्वेशपदांबुजप्रणामः॥ न पुनर्जननं ददाति सत्यं भुजमुद्धृत्य न संशयं कुरु
ष्व॥ अकृतेशपदांबुजप्रणामाः नरकावासमवाप्य दुःखभोगं॥ समवाप्य मुहुर्निर्गता न भवंति प्रलयेपि ८
सत्यमेव॥ विविधार्जितपातकाश्रया ये न नमंति त्रिपुरारिमादरेण॥ अत एवाय मालयांतरेनेति वसं

त्यत्र च हमात्य दुःखभाजः प्रणमंत्यमरास्त्रिलोचनं मुनयः सिद्धगणाश्च संततं॥ निगमाश्च नमंति सं
ततं प्रणवस्य प्रणम्यहं तमीशं॥ सकलामरवंद्यपादपद्मं कृतपद्मत्रिदशैकभागधेयं॥ भज सं
ततमद्रिजासहायं निरपायं निर्वद्यमुत्तमुपायं॥ यज कोमलबिल्वपल्लवैरथ बेलं हृज घाधि
पैकहारी॥ सकलाघहरं निरस्तवीरं हरमाराध्यतरं परं सदा॥ भजतामभयप्रदं महेशं भज मृत्युंज
यमादरेण नित्यं॥ तमुपास्य न सेवसे द्विजत्वं हितमेव सं समुद्दीरितं मयाते॥ द्विजते शिव एव दैवतं सु
रेषु॥ अत एव निरंतरं महेशं भज फालस्फुरदुग्रवह्निपुंजं॥ द्विज दैवत दैवतं महेशं यदि नाराधयसि
प्रकाममित्थं॥ द्विज दैवतदानसंगतानवसन्नमप्रमदान्यथा तु॥ श्रुतिबोधितभस्मधारणं वि

हितं यच्छिवलिंगपूजनं॥ तदिदं द्वयमास्तिकद्विजैर्न परित्याज्यमिति श्रुतिस्त्वयं॥ द्विजकैर्बलभस्म
धारणं स्वसततं केवललिंगपूजनं॥ श्रुतिबोधितमिति वै हि तस्मात्पुनरुपास्यद्वयमप्यनन्यथा
जा॥ शिवमेव भजस्व सर्वकाले शिवभिन्नमयजस्व मोहितोपि शिवभिन्नसमर्चनं प्रथैवेत्य
नुवारकरुणानिश्चये द्विजत्वं शिवशंकरचंद्रशेखरेत्यतिभक्त्या वद संततं मुदा॥ शिवनाम
जपं विहाय नान्यज्जपमोहादपि नामसर्वथैव॥ शिवनामसुधैव विप्रतेयास्ततं मुक्तिभ
क्तिमिसिता द्विजेन॥ शिवनामसुधापरं तु जिह्वाध्विजनानाविध भूरिपुण्यलभ्या॥ शिव ७
नामसुधारतैव जिह्वा महतामेव भवत्यतोनुवारं॥ शिव शंकरचंद्रशेखरेति॥ त्रि

वारं पुरारेति जपस्व स्वायधानं॥ शिवनामसुधां मुहुर्मुहुः पिब सानंदमनंतरायमाशु॥ शि
वनामसुधैव मुक्तिहेतुर्मुनिवृंदैरखिलैश्च सेव्यमाना॥ अमृतामृतमार्यमुक्तिबीजं॥ शिवना
मामृतमित्यवेमि सत्यं॥ अत एव मुहुर्मुहुर्मया शिवनामामृतमेव पीयते॥ शिवनामसु
धां त्रिपिब भक्त्या सुधियः साधु सुधीच नाद्रियंते॥ द्विविपीतसुधाम्रयांति गर्भं शिवनामा
मृतपाः प्रयांति मुक्तिं॥ शिवनामसुधा विनिर्मिता गिरिजेशेन पुराकृपालुना॥ द्विजसाकृतपु
ण्यसंचयैर्मुहुरत्यंतमुदा निपीयते॥ रसभाजनभोजने निदानं रसना सैव मुहुर्मुहुः प्रकामं॥ शि
वनामसुधायैनीपीयते नीयमेनान्यविलापनं विहाय॥ शिवमर्चितमन्वहं प्रसुनैर्नवबिल्वैरपि

यस्यसावधानं॥ईदृशेनफलमतीयतोब्धो विलसत्यम्रपलाशपुष्पकांत्योः॥नवबिल्वदलैःस
मर्चितंद्विजसाधुपत्न्यतो॥विविधार्जितघोरपापसंचयः प्रलयंयातिनसंशयंतदेव॥शृणुसर्व
कथामहेशयोर्पहांत्रिरनुवारंनियमेनसावधानं॥इदमेवफलंविनिश्चितंश्रुतिभिःश्रोत्रयुग
स्यवस्तुतस्तु॥नवकोमलबिल्वपत्रवैःशिवलिंगंसावधानमर्चयितव्यं॥शिवसात्कृतबि
बिल्वपत्रवासमुदाघ्रायविनोदयस्वचित्तं॥स्पृशशंकरमर्चितंत्रिकालंस्वयंप्रतिवारं
वदतिप्रबोधकृत्॥त्रिपुरारिकथासुपूजनेपित्रिपुरारेरभिवीक्षणेपिचित्तं॥महतीभव ८
तिह्यनन्यभाजानभवत्येवदुरात्मनांकदापि॥ ॥